# Rama Geeta Govinda

# रामगीतगोविन्दम्

## Document Information

Text title : Rama Geeta Govinda

File name : rAmagItagovindam.itx

Category : raama, kRitI, gItam, aShTaka

Location : doc_raama

Author : Jayadeva Kavi

Transliterated by : Keshavchaitanya Kunte

Proofread by : Keshavchaitanya Kunte

Latest update : July 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 9, 2023

*sanskritdocuments.org*

# रामगीतगोविन्दम्

(कवि जयदेवविरचितं रागकाव्यम्)

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीरामचन्द्राय नमः ॥

## प्रथमसर्गः १ सानन्दरघुनन्दनः

## अष्टपदी १ गीतं प्रथमम्

जय जय राम! हरे ॥ ध्रु.॥

स्मृतिवेदाद्युद्धारक जनतारक ए ।
शङ्खसुमन सुरवन्द्य ॥ १॥

नमदाखण्डलशेखर धृतमन्दर ए ।
सन्ततजगदाधार ॥ २॥

हेमनयनसंहारण खलदारण ए ।
भुवनानन्द मुकुन्द ॥ ३॥

कनककशिपुतनुघर्षण घनकर्षण ए ।
धृतजगतीवरभार ॥ ४॥

चरणसलिलकृतपावन बटु वामन ए ।
अजिनदण्डधर देव ॥ ५॥

क्षत्रियवंशनिकन्दन भृगुनन्दन ए ।
करकोदण्डकुठार ॥ ६॥

विहितसुजनसम्भावन जितरावण ए ।
रघुकुलकमलदिनेश ॥ ७॥

मुरचाणूरविनाशक रिपुशासक ए ।
सिन्धुसुतासञ्चार ॥ ८॥

वेदविहितविधिखण्डन सुरमण्डन ए ।
दनुजभेदकर देव ॥ ९॥

यवनविदारण दारुण हयवाहन ए ।
धृतकरवाल कराल ॥ १०॥

श्रीजयदेवविधायक युतशायक ए ।
कुरु कुशलं प्रणतेषु ॥ ११॥

## अष्टपदी २ गीतं द्वितीयम्

वन्देऽरविन्द नयनाम्बुदाभ कमनीय मूर्तिधर पद्मनाभ ॥ १॥

कोदण्ड-कला-कौतुक-निधान पाखण्ड-विखण्डन गरुडयान ॥ २॥

कल्पान्तकोल करुणावतार कल्याण कमठकृत कर्णधार ॥ ३॥

मायाविलास नानारूप कुन्दामदशन जयदेक भूप ॥ ४॥

राजाधिराज वीराधिवीर रणकर्मकुशल बलगुणगभीर ॥ ५॥

त्रिशिर खर दूषण दूषणान्त अज निर्व्यलीकगोतीत कान्त ॥ ६॥

ब्रह्मादि देवगण पूज्यपाद विभ्राज्यमान विस्मित विषाद ॥ ७॥

जयदेव भणितमय शस्त्रवर्म विदधातु सदा प्रणतेषु शर्म ॥ ८॥

## अष्टपदी ३ गीतं तृतीयम्

रम्यबालरूपं राममभिराममहमीडे ।
रावणाभिभवपरितप्तसुरसिद्धगणयाचितं जयति वरमीडे ॥ १॥

इन्द्रनीलाभतनुमतनुशतकोटिरुचिमिन्दुमुखचन्द्रमुरहारम् ।
कौस्तुभामुक्तकन्धरमरुणपाणिपदमम्बुरुहनयनमलितारम् ॥ २॥

कम्बुनिभकण्ठमतिनीलचिकुरावलीविजित जलबाहसङ्घातम् ।
गूढतरजत्रुमाजानुभुजदण्डधरमुरसि भृगुचरणजलजातम् ॥ ३॥

विविधमणिचित्रहेमाऽभरणभुषितं हेतिसंविहितजयगानम् ।
मन्दमन्दस्मित बन्धुविपाऽधरे पङ्कगामित्रचरयानम् ॥ ४॥

कनकमयपट्टमण्डितललाटस्थलं कुन्दकुन्कुमाभरदभासम् ।
रुचिरमखसूत्रभृतमिन्दिरासङ्कुलं पीतकौशेयशुभवासम् ॥ ५॥

सुखदनासापुटं शीलकरुणाकरं सख्यसङ्कल्पमहितल्पम् ।
दानवाननीकमतेभपञ्चाननं विहितपलदिवसयुगकल्पम् ॥ ६॥

कोशलाधीशजायादिशिशुशोकहरमम्दुतं वीक्ष्य कौसल्या ।
अवददिति रूपमधुना जहिहि केशव त्राही मामपगतशल्या ॥ ७॥

पठति या ज्ञानमज्ञानतिमिरापहं वैष्णवं त्रिजगदतिसारम् ।
भावुकं चारु जयदेवकविनिर्मितं याति भवसिन्धुपरपारम् ॥ ८॥

## अष्टपदी ४ गीतं चतुर्थम्

रामवदनमतिमञ्जु विलोकय ।
शारद-कोटी-शशिनमिव निर्मलमक्षीचकोरं रोपय ॥ १॥

भृकुटि-कुटिल-धनुर्वलितं नवकुङ्कुम-तिलकललाटम् ।
सुहृय-हृदय-विशोककरं करुणामय-नयन-विपाटम् ॥ २॥

क्षीरपयोनिधि-वीचिविनिन्दक-विशदमनोहर-हासम् ।
कुन्दकुसुम-कमनीयलसद्रशनावलि-किरण-विकाशम् ॥ ३॥

नागलतारस-रागधराधर-पल्लवमयहृदि-हासम् ।
कीरमुखाकृति धीरसुगन्ध-समीकरण-नासावासम् ॥ ४॥

नानारत्न-विचित्र-हिरण्मय-मुकुट-विभागमतोलम् ।
मकराकार-कनककुण्डल-युग-चलन-विभासि-कपोलम् ॥ ५॥

कम्बु-रुचिरतर कण्ठमृदम्बुनील-विजृम्भितकेशम् ।
रघुकुल-कैरव-कानन-नियत विकाशक-चारू-निशेशम् ॥ ६॥

मङ्गलमोदकरं सुचिरं निजभक्तसतामनुकुलम् ।
लोकचतुर्दश-पालनदक्षमपक्षविनाशमतुलम् ॥ ७॥

श्रीजयदेवकवेरिदमुदयति हरिचरणस्मृतिसारम् ।
सुखयतु साधुजनं सततं किल शमयतु विषयविकारम् ॥ ८॥

## अष्टपदी ५ गीतं पञ्चमम्

रामचन्द्र करकमलमुदारम् ।
भज भजनीयममलमतुलितरुचि दमितदनुजपरिवारम् ॥ १॥

धृतकोदण्डविशिखमणिभूषणमरुणमनोहरवेषम् ।
भागधेयसूचकविशुद्धतरविविधवर्णशुभरेखम् ॥ २॥

स्फुरदङ्गुलिनखराजिविराजितममरनिकरकृतरागम् ।
मुक्तादलभूषितदलसङ्कुलसरसिजमिव वरभागम् ॥ ३॥

वरमभीष्टमभयं दददद्भुतमाजिकलासुपवनिम् ।
अरिषड्वर्गमधुपमदगञ्जनमनुपममञ्जनहीनम् ॥ ४॥

धर्मादिकफलनमितमहर्निशमजशङ्करमुनिगीतम् ।
कमलापाणिकनललालिततततममसुरविघातविनीतम् ॥ ५॥

कपिलादिकसनकादिनिषेवितमशुभशमनमतिभारम् ।
वेदपुराणसकलसम्मतमिव सादितविषमविकारम् ॥ ६॥

चिन्तामणिसुरधेनुकल्पतरुकोटिदानगुणशीलम् ।
प्राकृततत्त्वप्रपञ्चरोगहरमखिलचराचरलीलम् ॥ ७॥

श्रीजयदेवभणितमतिमञ्जुलमधुरमनोहरगानम् ।
दिशतु सदामङ्गलमतुलितमिति परमानन्दनिधानम् ॥ ८॥

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये श्रीजयदेवकृतौ
सानन्दरघुनन्दनो नाम प्रथम सर्गः ।

## द्वितीयसर्गः २ विजितपरशुरामो

## अष्टपदी ६ गीतं षष्ठम्

प्रणमामि राममनुत्तमं मनुवंशकञ्जरविम् ।
कन्दर्पकोटिसमान-सुन्दररूपमादिकविम् ॥ १॥

ब्रह्माभिधानमलेपमजमद्वैतमप्रलयम् ।
सद्रूपवन्तमबाधिकं चिन्मात्रमम्बुशयम् ॥ २॥

सत्यस्वरूपममेयमक्षरमप्रपञ्चगतम् ।
अव्यक्तमप्रतिमं निरीहमखण्डमीशमतम् ॥ ३॥

स्मृतिवेदहरशङ्काऽसुरप्रतिघातदक्षतरम् ।
क्षीरोदमथनमहागमन्दरपृष्ठभागधरम् ॥ ४॥

उत्तुङ्गरदशिखरेण चायतभूमितूलकरम् ।
प्रल्हादपालकमसुरकालकमभ्रभेदधरम् ॥ ५॥

कोदण्डबाणकुठारकरतलमखिलबाहुजहम् ।
साकेतभूपतिनन्दनं सत्यादिबाहुवहम् ॥ ६॥

जलदाभमिन्दुनिभाननं किञ्जल्कपातपटम् ।
मणिचित्रहेमकिरीटभूषितचारुभालतटम् ॥ ७॥

इति पठति यो रघुवीरवर्णनमुज्ज्वलं सुचारम् ।
जयदेवनिर्मितमित्यनूपममेति मोदभरम् ॥ ८॥

## अष्टपदी ७ गीतं सप्तमम्

जयति विदेहनगरमनुरूपम् ।
दिशीदिशी राजमानचामीकररचितविविधमणियूपम् ॥ १॥

रुचिरलतातरुसुमनवाटिकावापीकूपतडागम् ।
वप्रवलयपरिखावृतमभिनवचित्रमुदयदनुरागम् ॥ २॥

शेषभयङ्करवेशनृपतिदुर्धर्षमहेशपिनाकम् ।
मणिमयसौधसमूहमुदग्रमरुच्चलविशदपताकम् ॥ ३॥

तोरणनिकरकिरणसञ्चारविनिन्दितसुरपतिचापम् ।
आहुतिगन्धसहितमखधूमविधूतसकलजनपापम् ॥ ४॥

गजरथतुरगपदातिविघट्टविशृङ्खलशब्दमुदारम् ।
शारदविधुसङ्काशविकाशकनककलशाश्रिततारम् ॥ ५॥

पण्डितसुमतिसुशीलसुधर्मसुकर्ममनुजपरिवारम् ।
पतिपदपद्मनिहितनिजचित्तचतुरसुन्दरपुरदारम् ॥ ६॥

सुखदवितानमनेकतपोधनभूषितमतिशयलोभम् ।
पङ्कजयोनिविनिर्मितमिवकृत सन्ततमानसलोभम् ॥ ७॥

श्रीजयदेवकवेरुदितं मिथिलापुरगीतमशोकम् ।
मङ्गलमोदभरेण करोतु सदामुदितं जनलोकम् ॥ ८॥

## अष्टपदी ८ गीतमष्टमम्

परशुराममवलोक्य सकोपम् ।
रघुपतिरभिजहर्ष युगबाहुविहितबहुबाहुजलोपम् ॥ १॥

भृकुटीकुटिलमरुणवदनं रदखण्डितरदपरिधानम् ।
दधतमिव द्युमणिं शशिनं सकुजं ससितं कृतमानम् ॥ २॥

रुचिरजटामुकुटद्युतिपुञ्जविभासिमनोहरभालम् ।
पाणिसरोजनिहितशरचापकुठारमतीवकरालम् ॥ ३॥

एककविंशतिवारमहाविजयस्फुटशं गजलेखम् ।
भूतिविभूषितविग्रहभागमनूपमरूपमशषेम् ॥ ४॥

ललितसुमेरूवलयपरिवीतमुमापतिशिष्यमुदारम् ।
चन्द्रविशदमखतन्तुसमेतमलिप्रभनिश्चलतारम् ॥ ५॥

अस्त्रशस्त्रसम्भूतमहाव्रणवक्षसमाहवधीरम् ।
कटितटयुगलनिषङ्गधरं जलवाहकशब्दगभीरम् ॥ ६॥

शिवशिवमन्त्रममुं जपमानमरिक्षयहेतुम् ।
दर्भपटीमृगचर्मयुतं भृगुवंशमनुत्तमकेतुम् ॥ ७॥

श्रीजयदेवकवेरुदितं द्विजराजमहाभटरूपम् ।
पूरयतु प्रणतस्य जनस्य मनोरथमामनुरूपम् ॥ ८॥

## अष्टपदी ९ गीतं नवमम्

जय रामचन्द्र कमलाविहार ।
जय कोशलेश करूणावतार ॥ १॥

रघुवंश-कमल-कानन-दिनेश ।
कन्दर्पकोटी कमनीयवेश ॥ २॥

कालाग्निसदृशकोपातिरेक ।
गन्धर्वगीतपूरितविवेक ॥ ३॥

रजनीचर-प्रकर-विपिनदाव ।
वेदान्तवेदगणभणितभाव ॥ ४॥

वागीश सर्वविद्याविचार ।
ब्रह्मादिवन्द्य हृतभूमिभार ॥ ५॥

मदमोहकाम-पन्नगखगेश ।
शरदिन्दुनिभानन कुटिलकेश ॥ ६॥

तडिदाभवसन रमणीयहास ।
कुन्दाभदशन मायाविलास ॥ ७॥

जयदेव विनयमतिशयमवेहि ।
निजचरणकमलमधुमेव देहि ॥ ८॥

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये श्रीजयदेवकृतौ
विजितपरशुरामो नाम द्वितीयः सर्गः ।

## तृतीयसर्गः ३ जगन्निवासः

## अष्टपदी १० गीतं दशमम्

श्रीरामरूपमनूपमं पश्यामि तापहरम् ।
जलेन्द्रनीलमणि प्रभं शरदिन्दुवक्त्रधरम् ॥ १॥

कनकासने मणिमण्डपे सपरिच्छदेऽधिगतम् ।
जनकाऽधिराजसुतासमेतमशेषयोगिमतम् ॥ २॥

चपलाविभूषितसजलजलधरमिव मनोहरणम् ।
किञ्जल्कपातदुकूलसङ्कुलमिन्दिरारमणम् ॥ ३॥

केयूरकुण्डलमुकुटकङ्कणमुद्रिकारुचिरम् ।
मुक्ताभरदनमनङ्गसुन्दरमङ्गुलीरुचिरम् ॥ ४॥

विद्याविचारणदक्षमच्छमपक्षपक्षकरम् ।
कल्याणभाजनमीश वन्दितमीतिशरम् ॥ ५॥

आजानुबाहुमुदारविक्रममर्ककोटिरुचम् ।
निःशेषलक्षणलक्षणीयमपास्तरोगशुचम् ॥ ६॥

मन्दारमल्लीकुन्दतुलसीदामसंवलितम् ।
श्रीवत्साचिह्नितवक्षसं स्वर्णोपवीतचितम् ॥ ७॥

जयदेवभाषितमष्टपदमंहोनिराशपरम् ।
श्रेयो दिशत्वखिलं जनाय निजाय लोकवरम् ॥ ८॥

## अष्टपदी ११ गीतमेकादशमम्

सखे सानुरागं भजतु रघुवीरपदमेकम् ।
सर्वसौभाग्यसम्पत्तिसन्देहकरमिन्दुशतकोटिरुचिसेकम् ॥ १॥

केतुदम्भोलिरेखाङ्कुशच्छत्रवरचिह्नमम्भोजहारम् ।
ब्रह्मवागीशसनकादिमुनिसेवितं वेदवेदान्तमतसारम् ॥ २॥

नम्रदिक्पालगण मौलिमणिमालिकाकान्तिविस्तरणमतिशोभम् ।
सिद्धविघ्नेशयज्ञेशविनाशवसुतुषितगन्धर्वकृतलोभम् ॥ ३॥

पूरितानन्दकामारिशिरसि स्फुरद्विमलगङ्गौघजटसिक्तम् ।
शापवशगौतमीपापपरिणामहरमरुणमुद्योतद्युतिरक्तम् ॥ ४॥

अञ्जनीनन्दनप्रेमकासारसरसीरुहं योगिगणयत्नम् ।
इन्दिरापाणिपाथोजवरलालितं सद्वृत्तपावनं निपुणरत्नम् ॥ ५॥

विपुलविस्तारसंसारसागरतरणशरणशुभकल्पदृढनावम् ।
काममदमोहलोभदिकाननमहाविधविषमतमदावम् ॥ ६॥

दर्शनादेव लोकर्तिशोकापहं राक्षसाभिभवमभिरामम् ।
कामतरुकाममणिकामधुक्कोटिगुणदानकरपरमविश्रामम् ॥ ७॥

जयति गम्भीरजयदेवकविभारती पुण्यदा शमितपरितापा ।
राजराजेन्द्र रघुवीरचरणाम्बुजस्मरणशुभकरणगतपापा ॥ ८॥

## अष्टपदी १२ गीतं द्वादशम्

विहरति हरिरिह सरयूकूले ।
पद्मरागचामीकरमरकतबद्धविविधतरुकुले ॥ १॥

सादरमज्जदमितयुवतीकुचकुङ्कुमपिङ्गलनीरे ।
शमदमादिसाधनविवेकवशमुनिजनसङ्कुलतीरे ॥ २॥

विलिखितमकरनिशाकर दिनकरचञ्चल विशदपताके ।
दिव्यासनविशेषपूरितदूरीकृतदुरितविपाके ॥ ३॥

सारसजलकोयष्टिमरालकचक्रविजृम्भितनादे ।
पङ्करुहकेदारविबोधनपरिमलशमितविषादे ॥ ४॥

यातायाततुरङ्गमतङ्गजकरभमनुजरथयाने ।
दिशिदिशि निजविश्रामकामबहुविरचितरुचिरविताने ॥ ५॥

राजदनेकलवङ्गलतावलीमुनिपादपचूते ।
भ्राजिततुरगतरङ्गविकाशलसत्तुलसीदलपूते ॥ ६॥

देवगृहैरभितः स्फुरति प्रणवादिकमन्त्रविचारे ।
ध्यानपरायणसिद्धसमूह-निराकृतविषयविकारे ॥ ७॥

श्रीजयदेवकवेरुदितं सरयूसरिदुज्ज्वलगानम् ।
सर्वसतामनिशं भवतु प्रियदं सुखमोदनिधानम् ॥ ८॥

## अष्टपदी १३ गीतं त्रयोदशम्

शृणु मम वचनमिदं नृपभूषण
सत्यसिन्धुविद्याहतदूषण ।
देहि वरं नाथ जहि न धर्मपथम् ॥ १॥

देवासुररणमध्यसलीलम् ।
भङ्गमगमदुत्तमरथकोलम् ॥ २॥

निजकरमर्प्य तत्र धृतशायक ।
दत्त विजययशस्त्वयि नायक ॥ ३॥

समयमवाप्य वदति विज्ञानी ।
तस्मादिहि न निनिन्दितवानी ॥ ४॥

कुरु भरतं कोशलपुरनाथम् ।
रघुपतिरेतु विपिनमुनिगाथम् ॥ ५॥

न तु तव धर्महानि न हि पापम् ।
तामुपनयति सहितमहितापम् ॥ ६॥

आकलय्य भूपतिरिपुकल्पम् ।
मनसि चकार जीवसङ्कल्पम् ॥ ७॥

श्रीजयदेवकरचितरहस्यम् ।
साधुजनस्य तनोतु यशस्यम् ॥ ८॥

## अष्टपदी १४ गीतं चतुर्दशम्

पश्य पश्य रघुवीर प्रयागम् ॥

मज्जदखिलमुनिगणमतिरागम् ।
सीतया सह सन्ततमेतम् ॥ १॥

नीलपीतासितचित्रपताकम् ।
सुखसमूहशिथिलीकृतनाकम् ॥ २॥

सिंहासनपरिपूरितकूलम् ।
ज्ञानयोगजपसाधनमूलम् ॥ ३॥

वाणीजन्हुतरणिजासङ्गम् ।
निमिषादेति कलुषमतिभङ्गम् ॥ ४॥

उपवनवनभूषितमहिदेशम् ।
सकलकलाकल्पितशुभवेशम् ॥ ५॥

मनुजाकारसुरासुरनागम् ।
विहितनृपतितापसवरयागम् ॥ ६॥

मुक्तिचतुर्विधसुलभमनूपम् ।
राजमाननानामणियूपम् ॥ ७॥

श्रीजयदेवभणितमिति गीतम् ।
सुखयतु रामचरणमुपनीतम् ॥ ८॥

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये श्रीजयदेवकृतौ
जगन्निवासो नाम तृतीयः सर्गः ।

## चतुर्थसर्गः ४ लङ्काप्रवेशो

## अष्टपदी १५ गीतं पञ्चदशम्

चित्रकूटमवलोकय सीते ।
उन्नतशिखरलिखितघनमण्डलमङ्गलकरणविनीते ॥ १॥

मन्दाकिनीप्रवाहविलङ्घनचञ्चलपक्षमरालम् ।
विकसितकुन्दलवङ्गतालवलीसरसीरुहमालम् ॥ २॥

चम्पकभूर्जकदम्बतमालमुनिद्रुमभूषितमागम् ।
वैरविहीनमतङ्गजसिंहमयूरमहाविषनागम् ॥ ३॥

स्फटिकपद्मरागेन्द्रनीलमणिहारकगैरिकशोभम् ।
शीतलधीरसुगन्धसमीरणमृषिजनमानसलोभम् ॥ ४॥

गवयशरभहरिणीहरिणादनकपिकुलविपुलविहारम् ।
इन्धनदलफलकुसुमदर्भजलहेतुकमुनिसञ्चारम् ॥ ५॥

शुकहारीतचकोरशारिकाखञ्जनकोकविरावम् ।
निर्झरशरणसलिलशीकरमरविगतविषमतरूदावम् ॥ ६॥

गुहानिवासकिरातहूणखसविरचितविटपवितानम् ।
वनदेवीससतालसुसुररसश्रुतिकृतमङ्गलगानम् ॥ ७॥

श्रीजयदेवमहाकविनिर्मितमद्भुतभूधरगीतम् ।
हरतु मलं सकलं पठतामनिशं प्रकरोतु विनीतम् ॥ ८॥

## अष्टपदी १६ गीतं षोडशम्

दण्डकवनमतिचारु चकाशे ।
शारदेन्दुनिर्मलरुचिरघुपति यशसि जगति सविकाशे ॥ १॥

निर्भयकुम्भजदिनानामुनिजनकृतसाधनयेआगम् ।
विगतवैरमृगदस्युखगादिबलाहकदाववियोगम् ॥ २॥

गोदातरलतरङ्गविचित्रितरुचिरकूलकृतशालम् ।
विहितनिवासविदेहसुतारघुनाथसुमित्राबालम् ॥ ३॥

खण्डितकामसमाकुलशूर्पणखाश्रुतिकरणविनासम् ।
खरदूषणरजनीचरसहितसहस्रचतुर्दशनाशम् ॥ ४॥

रावणशासनकनकहरिणमारीचनिपातनिधानम् ।
सीताहरणविलापनगृध्रविलोकनसङ्गतिदानम् ॥ ५॥

योजनबाहुकबन्धमहासुरमारणपावकसङ्गम् ।
नवधाभक्तिविवेकविचारणशबरीसंसृतिभगम् ॥ ६॥

नारदमुनिदर्शनविधिसन्ततरुचिरकलध्वनिगीतम् ।
पम्पानिकटसमीरतनयसंवादविशेषमभीतम् ॥ ७॥

श्रीजयदेवकवेरुदितं दण्डकवनचरितमनूपम् ।
यच्छतु मुक्तिपदं विमदं सुचिरं रुचिरं शुभरूपम् ॥ ८॥

## अष्टपदी १७ गीतं सप्तदशम्

श्रीरामनाम मनोरमं भजामृततत्त्वमयम् ।
नतनोति यत्स्मरणेन जन्मजराधिमरणभयम् ॥ १॥

सुकृतेः परं प्रकृतेःपरं सत्त्वादिभावगतम् ।
विश्राममेकमनोगिरामज शङ्कराभिमतम् ॥ २॥

प्रल्हादनारदपुण्डरीकपराशरादिनुतम् ।
संसारसागरसुप्लवं मन्त्राधिमन्त्रयुतम् ॥ ३॥

यदि भजसि हरिमपि केवलं हृदि कर्मणा वचसा ।
योगेन किं यज्ञेन किं ह्यपरेण किं तपसा ॥ ४

उद्गीथरम्यपदक्रमोपनिषत्सुगीतपरम् ।
शबरीजटायुरजामिलादिकतापपापहरम् ॥ ५॥

रागादिदूरमशेषमुनिजनसेवितं सततम् ।
लोकाभिराममनमानमानसमञ्जसाविततम् ॥ ६॥

ब्रह्माण्डसम्पुटरत्नमुज्ज्वलमकलमप्रलयम् ।
सर्वाश्रयं सर्वातिगं सर्वार्तिहं च समम् ॥ ७॥

तृष्णानिविडरजनीदिवाकरमसुरयूथभिदम् ।
जयदेवभाषितममद्भुतं भवसारभूतमिदम् ॥ ८॥

## अष्टपदी १८ गीतमष्टादशम्

लङ्कापुरमवलोक्य करालम् ।
नानाभटपरिपूरितशालम् ।
स्मृत्य विभुं वातसुतो न चकार भयम् ॥ १॥

बहुविधलोहयन्त्रशृङ्गबाणम् ।
दौवारिकघृतपाणिकृपाणम् ॥ २॥

रुचिरनिकेतनतोरणमालम् ।
भ्राजमानमणिविरचितजालम् ॥ ३॥

शुभसोपानवापिकारम्यम् ।
सुरतरुभूषितविपिनमगम्यम् ॥ ४॥

सन्ततमसुरनिकरसञ्चारम् ।
कीलितलोकपालसुरदारम् ॥ ५॥

तुङ्गकनकमयसौधविकाशम् ।
मयनिर्मितमगपतिसङ्काशम् ॥ ६॥

अतिशयरुचिरदेववरगेहम् ।
देवविनिर्मितनिरूपमगेहम् ॥ ७॥

श्रीजयदेवविनिर्मितगानम् ।
सुखयतु साधुनिचयमनुमानम् ॥ ८॥

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये श्रीजयदेवकृतौ

लङ्काप्रवेशो नाम चतुर्थः सर्गः ।

## पञ्चमसर्गः ५ लङ्काविजयो

## अष्टपदी १९ गीतमेकोनविंशम्

रजनीचररमणीपरिवीता ।
बालचन्द्रकलिकेव समीता ।
नाथ हरे सीदति सीताऽशोकवने ॥ १॥

कृशशरीरगतिरतिशयदीना ।
भूमिशयाशनसलिलविहीना ॥ २॥

ध्यायति तव मुखचन्द्रमुदारम् ।
त्यजति भुजगमिव मणिमयहारम् ॥ ३॥

भजति निशेषकिरणमिव जालम् ।
स्पृशति करेण मुहुर्निजभालम् ॥ ४॥

कलयति शरमिव मलयसमीरम् ।
मुञ्चति तप्तविलोचननीरम् ॥ ५॥

विरहतया विदधाति न हासम् ।
जनयति वन्हिविषमनिश्वासम् ॥ ६॥

रामरामरामेति सकामम् ।
वदति विलापतया वसुयाभम् ॥ ७॥

श्रीजयदेवकवेरिदमुदितम् ।
मुखयतु रामभक्तमतिमुदितम् ॥ ८॥

## अष्टपदी २० गीतं विंशम्

पश्य पश्य रघुवर वरसेतुम् ।
परमदुरासदरूपपयोनिधिसलिलावलङ्घनहेतुम् ॥ १॥

शैलनिवहमानीय सुमनमिव शतयोजनपरिमाणम् ।
नानाकारशरीरवलीमुखवीराविहितनिर्माणम् ॥ २॥

वालितनयसुग्रीववायुसुतनलनीलादिविचारम् ।
शङ्खभुजगतिमिमकरचक्रकुलसङ्कुलमतिविस्तारम् ॥ ३॥

अञ्जननीलनीरनिधिमध्यगमुज्ज्वलफेनविकारम् ।
छायापथमिव गगनसमुद्यतमुडुगणमिलितमुदारम् ॥ ४॥

ऋक्षमल्लबहुराजिविराजितमिन्दुकिरणसमरूपम् ।
लङ्काविजयपत्रमर्पितमिव विधिना विपुलमनूपम् ॥ ५॥

सिद्धयक्षविद्याधरकिन्नरसुरवरलोचनलोभम् ।
यातुधानरमणीजनलोचनरोदनमभिगतशोभम् ॥ ६॥

वालखिल्यवैखानसफेनपवनचरमुनिकृतजापम् ।
राजमानराकेयदूरकृतदारुणबन्धनपापम् ॥ ७॥

पठति जनः सुचिरं सुमतिर्जयदेवविनिर्मितगीतम् ।
पश्यति नैव कदाचिदपि प्रतिबन्धकसंसृतिभीतम् ॥ ८॥

## अष्टपदी २१ गीतमेकविंशम्

लङ्कापतिरालोकयदीशम् ।
इन्दीवरसमरुचिरविलोचनमरिमदमोचनकीशम् ॥ १॥

राकापतिशतकोटिमञ्जुमुखमनुपमचिबुकलसन्तम् ।
भृकुटीकुटिविलासतयारतिनायकचापहसम्तम् ॥ २॥

करकोदण्डशरप्रभया लसमानसमस्तशरीरम् ।
शक्रसमर्पितवर्मभृतं समराब्धिविलङ्घनधीरम् ॥ ३॥

बद्धजटामुकुटं निबिडं रजनीचरनाशनदक्षम् ।
चारुरथस्थमुदग्रपताकमखण्डितरोषविपक्षम् ॥ ४॥

कालनीयपशमं खलहं कलहं करदारुणमेतम् ।
मातलिसारथिसहितमत्तमहितलनबलेन समेतम् ॥ ५॥

परिकरकटितूणीरविभूषितमुद्गरबाणकरालम् ।
आकम्पिततुलसीदलसङ्कुलकुसुमकलितवनमालम् ॥ ६॥

तिष्ठ विमूढमते समरे दशकण्ठमिति प्रवदन्तम् ।

प्रस्फुरिताधरपल्लवयुगप्रविभासिमनोहरदन्तम् ॥ ७॥

श्रीजयदेवभणितमतिमञ्जुलरघुवरसमरविधानम् ।
पठति समरजयमतिशयपुरजयमेति महाभयदानम् ॥ ८॥

## अष्टपदी २२ गीतं द्वाविंशम्

जय रामचन्द्र मायाऽतिदूर ।
रविवंशविभूषण मुकुटशूर ॥ १॥

ब्रह्मामहेन्द्रगन्धर्वगीत ।
कल्याणनिपुण गुणगणविनीत ॥ २॥

चण्डप्रयात खण्डितविराध ।
स्वर्गापवर्गद सरदगाध ॥ ३॥

करुणानिकेततम प्रबलरोष ।
भावाधिगम्य जितसकलदोष ॥ ४॥

धाराधरप्रतिम नीलदेह ।
सद्रूपबोधमयमोदगेह ॥ ५॥

व्यालादपत्र शतपत्रनेत्र ।
कूटस्थ पाणितलकलितवेत्र ॥ ६॥

सीतापतिरघुपतिजैनरुद्ध ।
विशसितसमस्तमायाविरुद्ध ॥ ७॥

जयदेवविनिर्मितमेव राम ।
कुरु तेन नाथ मम हृदयधाम ॥ ८॥

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये श्रीजयदेवकृतौ
लङ्काविजयो नाम पञ्चमः सर्गः ।

## षष्ठसर्गः ६ रामाभिषेकः

## अष्टपदी २३ गीतं त्रयोविंशम्

पश्यत रामचन्द्रमतिशोभम् ।
विधिहरिहरदिननाथनाकपतिमुनिगणमानसलोभम् ॥ १॥

नीलशकलसनिभशरीररुचिशुक्तिसुविद्रुमहारम् ।
वामभागसीताशुभशोभितमनुगतहरिपरिवारम् ॥ २॥

भानुसमानपुष्परथसङ्गतमनुजसहितमसुरघ्नम् ।
चण्डविशिखकोदण्डविनाशितसकलचराचरविघ्नम् ॥ ३॥

मरतालिङ्गनगुरुपादाम्बुजप्रणतिविकम्पितभालम् ।
द्विजनतिकरणविधानपरस्परपृच्छं चलवनमालम् ॥ ४॥

मातृभवनकृतगमनमनिन्दितमणिमयपीठनिवासम् ।
चामरयुगलसितातपवारणमण्डितमञ्जुलहासम् ॥ ५॥

हसदुकूलपुञ्जमुकुटप्रभयाप्रतिमासिकपोलम् ।
निजजनमुपरिकृपामयशुभ्रकटाक्षनिवेशनलोलम् ॥ ६॥

बन्दिवेषधरवेदचतुष्टयविहितविजयगुणगाथम् ।
कनकरत्नमयपाणिविशेषकृताखिललोकसनाथम् ॥ ७॥

श्रीजयदेवविनिर्मितमतिशयरघुपतिचरितमनूपम् ।
हरिचरणस्य तनोतु शिवं हृदि मानसहंससरूपम् ॥ ८॥

## अष्टपदी २४ गीतं चतुर्विंशम्

जहिहि शयनमरविन्दविलोचन खगकेतो ।
करुणापूरित शुभनयनेन विलोकय मङ्गलहेतो ॥ १॥

उदयति भानुरयं विधुना सममेति समस्ततमिस्रम् ।
दधति नभोरुणतामरुणरुणेन बभूव सदोजसमिश्रम् ॥ २॥

विकसति पद्मवनं सकलं विहगावलिदातिनिनादम् ।
हंसविरावविबोधितचक्रनिचपगतसर्वविषादम् ॥ ३॥

दीपशिखातिविशुद्धतरा मलिनत्वमुपैति विशाला ।
सीदति कुमुदमुलूकततिः प्रतिगच्छति लयमुडुमाला ॥ ४॥

कर्षति श्रृङ्खलकं गजता युगभागविभाजितनिद्रा ।
नमति महीपसभाऽमिमुखं तव राघव दूरदरिद्रा ॥ ५॥

गायति सामखिलामखिलामृषिराजखण्डितवीणा ।
नृत्यति देववधू रुचिरायुतभावभरेण नवीणा ॥ ६॥

शीतलमन्दसुगन्धसमीरगलितकुसुमावलिरेखा ।
पठति परस्परमेव पटुः श्रुतिपाठमवारितवेषा ॥ ७॥

श्रीकविराजशिरोमणिदामलसज्जयदेवविगीतम् ।
मोदभरं सुजनस्य तनोति करोतु मनो रसनीतम् ॥ ८॥

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये श्रीजयदेवकृतौ
रामाभिषेको नाम षष्ठः सर्गः ।

इति कवि जयदेवकृतं रामगीतगोविन्दं सम्पूर्णम् ।

(Although in the similar form of the more
well-known Gitagovinda by Jayadevapandita,
this composition is by a different Jayadevakavi.

Selected songs were presented at
All India Road, Pune in 2009 with music
by Dr. Keshavchaitanya Kunte.
The audio of the program is available at
https://www.youtube.com/watch?v=Pxg8t3PGCpA
with Marathi/English commentary.

Encoded and proofread by Keshavchaitanya Kunte

*Rama Geeta Govinda*
pdf was typeset on July 9, 2023

Please send corrections to *sanskrit@cheerful.com*